# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ४** | **गुणाः - ७०** |
| विषयः - स्वामिनारायणवेदान्तः - J | (C.C.- 5.3.9. New ) | |
| दिनाङ्कः - ०७/१२/२०१८ | भगवद्गीता - १३-१८ | समयः -१०.०० तः १.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु एक एव समाधेयः ।** **( ५ )**

*(१) भाष्योक्तदिशा क्षेत्रज्ञस्य स्वरूपं प्रतिपादयत ।*

*(२) क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।*

*क्षेत्रक्षेत्रज्ञयोः ज्ञानं यत्तज्ज्ञानं मतं मम ॥ इतीमं श्लोकं सान्वयं व्याख्यात ।*

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) त्रयोदशाध्यायस्य सारांशं भाष्योक्तदिशा लिखत ।*

*(२) क्षेत्रकार्येषु आत्मज्ञानसाधनतया उपादेयाः गुणाः गोपालानन्दमुनिभाष्यमनुसृत्य निरूपयत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितेषु एक एव समाधेयः ।** **( ५ )**

*(१) मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।*

*सम्भवः सर्वभूतानां ततो भवति भारत ॥ इति श्लोकं यथाभाष्यं लिखत ।*

*(२) भाष्योक्तदिशा प्रकृतिपरिणामभूतस्य विश्वस्य अश्वत्थवृक्षाकारत्वमुपपादयत ।*

**प्रश्नः ४ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) सत्त्वरजस्तमसां त्रयाणां गुणानां स्वरूपम् , तैः जीवानां बन्धनप्रकारञ्च चतुर्दशाध्यायानुगुणमुपपादयत ।*

*(२) पञ्चदशाध्यायस्य सारभागं यथाभाष्यं सङ्गृह्णीत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितेषु एक एव समाधेयः ।** **( ५ )**

*(१) षोडशाध्यायोक्तदिशा आसुरसर्गम् उपपादयत ।*

*(२) भाष्योक्तदिशा आहारस्य त्रैविध्यम् उपपादयत ।*

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) भाष्योक्तदिशा दैवासुरीसम्पद्युक्तयोः पुरुषयोः लक्षणानि उपवर्णयत ।*

*(२) सप्तदशाध्याये प्रतिपादितरीत्या तपस: त्रैविध्यम् उपदर्शयत।*

## चतुर्थान्विति:

**प्रश्न: ७ निम्नलिखितेषु एक एव समाधेय: ।** **( ५ )**

*(१) त्यागस्य त्रैविध्यं भाष्योक्तदिशा निरूपयत।*

*(२) यज्ञदानतप:कर्म न त्याज्यं कार्यमेव तत्।*
*यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ इति श्लोकं गोपालानन्दमुनिभाष्यानुसारं व्याख्यात।*

**प्रश्न: ८ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) अष्टादशाध्यायोक्तरीत्या कर्मण: त्रैविध्यं प्रतिपादयत।*

*(२) बुद्धे: त्रैविध्यम् अष्टादशाध्यायोक्तरीत्या निरूपयत।*

**प्रश्न: ९ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्ना: समाधेया: ।** **( १० )**

*(१) चतुर्दशाध्याये भगवता श्रीकृष्णेन किमुक्तम् ?*

*(२) सर्वेऽपि मुनय: किं ज्ञात्वा परां सिद्धिम् अवाप्ता: ?*

*(३) महद्ब्रह्म- इति पदेन किम् अभिधीयते ?*

*(४) अहं वैश्वानरो.....पचाम्यन्नं चतुर्विधम्। इति श्लोकं पूरयत।*

*(५) षोडशाध्यायस्य नाम किम् ?*

*(६) सत्त्वसंशुद्धि: इति पदस्यार्थं लिखत ?*

*(७) श्रद्धा इति शब्दस्यार्थं लिखत ?*

*(८) सात्त्विकी श्रद्धा का ?*

*(९) क: यथावस्थितवस्तुज्ञानम् उत्पादयति ?*

*(१०) त्याग: कतिविध: सम्प्रकीर्तित: ?*

*(११) श्रीमद्भगवद्गीताया: पञ्चदशाध्यायस्य नाम किम् ?*

*(१२) ऋषिभि: बहुप्रकारं किं गीतम् ?*

*(१३) भगवद्गीताया: त्रयोदशाध्यायस्य नाम किम् ?*

*(१४) क्षेत्रविकारा: के ?*

*(१५) त्रयोदशादारभ्य अष्टादशाध्यायपर्यन्तो भाग: केन नाम्ना अभिधीयते ?*

--oo--